ॐ

# ॥ श्रीकाञ्चीकामकोटिपीठस्य काश्मीरदेशस्य च सम्बन्धः ॥

श्रीरमणशर्मा,

काञ्चीशङ्करमठः, नेरूर् अग्रहारः

(श्रीसदाशिवब्रह्मेन्द्रसन्निधिः)

प्रायः सार्धाब्दसाहस्रद्वितयात् प्राक् सदाशिवः । दृष्ट्वाऽधर्मेण धर्मस्य ग्लानिं सर्वत्र भूतले ॥

कालट्यां केरले श्रीमच्छङ्कराचार्यसंज्ञया । जातोऽकरोद् धर्मरक्षाम् इति वृत्तं समे विदुः ॥

स्वोत्तरं च तथैवैताम् अवितुं सत्परम्पराम् । स्वीयान् शिष्यान् दिक्चतुष्के पीठाधीशान् व्यधाद् वरान् ॥

स्वयमन्तेऽकरोत् काञ्च्यां वासं सर्वज्ञपीठगम् । कामकोट्याख्यकामाक्षीशक्त्याढ्यं शारदामठे ॥

तत्रैव चागमत् सिद्धिम् इति तथ्यं पुरातनम् । प्रोक्तं शिवरहस्यादौ सद्भिश्चैवादृतं मुदा ॥

काञ्ची दक्षिणकाश्मीर इति ख्यातं च दृश्यते । काञ्च्याम् इव च काश्मीरे वेदविद्याश्चकाशिरे ॥

तस्मात् काश्मीरसम्बन्धः काञ्चीपीठस्य विस्तृतः । ग्रन्थेभ्योऽत्र यथाज्ञातं सङ्ग्रहेण विलिख्यते ॥

कामकोटिपीठस्य प्रथमपीठाधीशैः **आद्यशङ्करभगवत्पादैः** (क्रि०पू० ५०९-४७७) काश्मीरं प्रति गतम् अस्ति इत्यत्र न सन्देहः । काश्मीरिकेण गोपादित्यनाम्ना महाराजेन (क्रि०पू० ४१७-३५७) स्वस्य शासनात् अल्पीयसः कालात् पूर्वमेव भगवत्पादाः तत्र आगताः इत्येतत् पुरस्कृत्य श्रीनगरे तेषां मन्दिरं निर्मितम् । (इदं च ग्वाशाहलालमहोदयविरचिते १९३२ वर्षे मुद्रिते A short history of Kashmir नाम्नि ग्रन्थे उक्तं वर्तते ।)

द्वितीयपीठाधीशत्वेन पूज्यमानानां **सुरेश्वराचार्याणां** (क्रि०पू० ४७७-४०७) जन्म काश्मीरेषु । "गौडः काश्मीरजन्मा" इति एषां विषये कामकोटिपीठपरम्परागतानाम् आचार्याणां चरितानि सङ्गृह्णती पुण्यश्लोकमञ्जरी आह । सारस्वतकान्यकुब्जगौडोत्कलमैथिलरूपेषु पञ्चगौडेषु कान्यकुब्जगौडा एते । एषां पिता हिममित्रः काश्मीरराजगुरुः आसत् । एषां सिद्धिः काञ्च्याम् अभवत् ।

षोडशपीठाधीशाः **उज्ज्वलशङ्करेन्द्रसरस्वतीश्रीपादाः** (क्रि०प० ३२९-३६६) स्वीयपीठाधिपत्यकाले सर्वत्र सनातनधर्मप्रतिबन्धकान् पराजित्य वर्णाश्रमधर्मं प्रतिष्ठाप्य काश्मीरेष्वेव सिद्धिं गताः । "विमतान् आमूलम् उन्मूलयन् आकाश्मीरम् अगान्महायतिरिति ख्यात्योज्ज्वलः शङ्करः" इति पुण्यश्लोकमञ्जरी । एषां सिद्धिस्थलं काश्मीरेषु कलापुरं नाम । तच्च एषां सिद्धिभूमित्वात् उज्ज्वलमहायतिपुरम् इति नाम प्रापत् । तत्रापि पुण्यश्लोकमञ्जरी – "अपहर्षशोकम् अजरं ब्रह्मैव यः शाश्वतं काश्मीरेषु कलापुरे यदधुनाऽप्याख्यायतेऽस्याख्यया" ।

सप्तदशपीठाधीशान् **गौडसदाशिवेन्द्रसरस्वतीपादान्** (क्रि०प० ३६६-३७४) अधिकृत्य महायोगिना सदाशिवब्रह्मेन्द्रेण विरचितायाः गुरुस्तुतेः गुरुरत्नमालाख्यायाः व्याख्यायां सुषमायाम् एवं वर्तते – इमे जन्मना

काश्मीरिकामात्यस्य देवमिश्रशर्मणः सूनवोऽभूवन् । सोऽयं देवमिश्रः जिनमताभिनिविष्ट आसीत् । परन्तु जननादेव “सनातनधर्म एव श्रेयान्, अद्वैतमेव सत्यम्” इत्येते अवदन् । तेन असूयिभिः जैनैः एते सिन्धुवेण्यां प्रक्षिप्ताः । तया परं नद्या सादरं नलिनीदले विधृताः, पुष्पपुरवासिनः भूरिवसुशर्मणः पुत्रीयतः स्नानार्थं नद्याम् अवतीर्णस्य हस्तयोः अर्पिताः, तेन पोषिता वर्धिताश्च । पश्चात् तं देशम् आगतानाम् उज्ज्वलशङ्करार्याणां सकाशाद् गृहीतसंयमाः, गुरूणां सिद्धेः परम् अष्टस्वेव वर्षेषु शिष्येभ्यः उपपञ्चाशवारं शारीरकमीमांसाम् अध्यापयन् । एते महाराष्ट्रेषु त्र्यम्बकेश्वरे सिद्धिं गताः ।

अष्टादशपीठाधीशाः **सुरेन्द्रसरस्वतीश्रीचरणाः** (क्रि०प० ३७४-३८४) काश्मीरिकस्य सुरेन्द्रनाम्नः राज्ञः सभाम् आगताः । तत्र दुर्दीदिविनामा महानास्तिकः दौष्ट्यं सर्वत्र प्रचारयन् स्थितः आसीत् । तेन सह वादं कृत्वा आचार्याः तम् अजयन् । तदा देवगुरुः बृहस्पतिः आचार्याणां माहात्म्यख्यापनाय मायामानुषरूपी तां सभाम् आगत्य दुर्दीदिविपक्षपरतया अभाषत । परन्तु आचार्याः तम् अपि अजयन्, तेन च सनातनं धर्मम् अद्वैतं च प्रत्यतिष्ठिपन् । स च सुरेन्द्राख्यः काश्मीरराजः बहुधा उपचारैः तान् सम्पूज्य सर्वमान्यभोग्यां कामपि भूमिं तेभ्यः समर्पितवान् ।

विंशपीठाधीशानां **मूकशङ्करेन्द्रसरस्वतीश्रीचरणानां** (क्रि०प० ३९७-४३६) काश्मीरसम्बन्धः इत्थम् । तेषां निकटे मातृगुप्तनामा कश्चित् कविः ब्राह्मणवटुः पूजाकैङ्कर्यं कुर्वन्नासीत् । तस्य कवितागर्वस्य निर्वासनाय आचार्याः स्वीयकटाक्षमात्रेण मठस्य अश्वपगजपौ नाम्ना रामिलमेण्ठकौ कवी तेनिरे । इत्थं क्षणमात्रप्राप्यं क्षणमात्रभङ्गुरं च कवितादिरूपं लौकिकं सामर्थ्यम् इति तदा मातृगुप्तो विवेकं प्राप । उज्जयिन्यां तदात्वे हर्षविक्रमादित्यनामा चक्रवर्ती आचार्येषु अतिगौरवयुतः विराजते स्म । तस्य सभां प्रति आस्थानकवित्वेन आचार्याः मातृगुप्तम् प्रेषितवन्तः । स च राजा मातृगुप्ते अतीव प्रीतिं दधौ । अत्रान्तरे काश्मीरेषु हिरण्यनामा महाराजः अनपत्यो ममार । तस्य भ्रातुः तोरमाणाख्यस्य अञ्जनानाम्नी पत्नी बभूव । तोरमाणोऽपि विपन्नः, अन्तर्वत्नी तद्भार्या च कुलालस्य कस्यचिद् गृहे शरणं गता । ततो जातः पुत्रः प्रवरसेनो नाम ।

हिरण्यस्य मरणे तस्य मन्त्रिभिः राज्यसुरक्षायै अभ्यर्थितः उज्जयिनीचक्रवर्ती हर्षविक्रमादित्यः मातृगुप्तमेव तदीयसाहित्यसौहित्यसम्माननरूपेण काश्मीरमहाराजं कृत्वा प्रेषितवान् । मातृगुप्तश्च तत्र पञ्च वर्षाणि साधु राज्यम् अकारयत् । तदुत्तरं विक्रमस्य मरणवार्तां श्रुत्वा निर्विण्णः अभवत् । सिंहासनार्हं पूर्वमहाराजभ्रातुष्पुत्रं प्रवरसेनं सिंहासने अभिषिच्य प्राक्तनादेव मूकशङ्करेन्द्रगुरोः सन्न्यासं प्राप्नोत् ।

तस्मिन् काले काश्मीरपर्वतावलिकान्तारस्य अतिदुस्तरत्वात् तत्रत्यानि तीर्थानि अटितुकामानां सुतरां क्लेशो जायते स्म । इदं दृष्ट्वा करुणयाऽऽविष्टाः आचार्यपादाः काश्मीरसिंहासनारूढेन प्रवरसेनेन तत्रत्यं कान्तारमार्गं परिष्कृत्य सुषमाख्यं राजमार्गम् अकारयन् । इदं चैषां महापथनिर्मापणकार्यं सर्वैः एषामनुग्रहपात्रैः मातृगुप्तरामिलमेण्ठकैः प्रवरसेनेन च स्वेषु ग्रन्थेषु अभिनन्द्य उल्लिखितम् । इमे विषयाः सुषमायां, प्रसिद्धेन आन्ध्रदेशीयेन इतिहाससंशोधकेन कोटावेङ्कटाचलमहोदयेन विरचितेषु च ग्रन्थेषु उपलभ्यन्ते ।

एकविंशपीठाधीशाः **जाह्नवीचन्द्रचूडेन्द्रसरस्वतीचरणाः** (क्रि०प० ४३६-४४६) उक्तरीत्या पूर्वं मातृगुप्तनामानः कञ्चित् कालं काश्मीरराज्यशासनं विधाय सन्न्यासोत्तरं दश वर्षाणि गङ्गातीरे एव तपस्तप्यमानाः तत्रैव सिद्धिं गताः ।

एकत्रिंशपीठाधीशाः **शीलनिधिब्रह्मानन्दघनेन्द्रसरस्वतीपादाः** (क्रि०प० ६५४-६६७) काश्मीरिकेण ब्राह्मणवंश्येन ललितादित्याख्येन राज्ञा पूजिताः अभूवन् । कृत्स्नं भारतवर्षं विजयमानः दक्षिणापथम् आगतः एषः काञ्चीमण्डलं सम्प्राप्य कामकोटिपीठम् उपसृत्य श्रीगुरुसेवां सादरं चिरं चकार । महाकविना भवभूतिना चैतद् महापुरुषविलासाख्ये काव्ये उदलेखि इति गुरुरत्नमालायां सुषमायां पुण्यश्लोकमञ्जर्यां च उल्लिखितम् ।

द्वात्रिंशपीठाधीशाः **चिदानन्दघनेन्द्रसरस्वतीश्रीचरणाः** (क्रि०प० ६६७-६७१) अपि तेनैव ललितादित्येन पूजिताः आसन् । सिद्धिं गतेषु स्वेषु गुरुचरणेषु ज्येष्ठरुद्र इति तेषां पूर्वाश्रमनाम्ना एते ललितादित्येन काश्मीरदेशे महतीम् अन्नदानशालां निर्मापयाम्बभूवुः । तस्यां शालायां लक्षाधिकेभ्यो यात्रिकेभ्यः अन्नं दीयते स्म । अथ च तेनैव राज्ञा पूर्वं विजितायाः रट्टानाम्न्याः कर्णाटकराज्ञ्याः समरे मृतायाः अनाथं कुमारं करुणया तेनैव राज्ये प्रतिष्ठापयामासुः ।

चतुस्त्रिंशपीठाधीशाः **चन्द्रशेखरेन्द्रसरस्वतीश्रीपादाः** (क्रि०प० ६९१-७०९) काश्मीरदेशे जैनमतप्रचारव्याजेन सनातनं धर्मं विरुन्धन्तं चकुणनामानं नास्तिकं वादैः विजित्य तत्र शास्त्रोक्तं धर्मं प्रवर्तयाम्बभूवुः ।

अष्टात्रिंशपीठाधीशानाम् **अभिनवशङ्कराख्यानां धीरशङ्करेन्द्रसरस्वतीश्रीचरणानां** (क्रि०प० ७८८-८३९) काले सर्वत्र भारते म्लेच्छानां दुर्मतानि प्रसृतानि आसन् । तदा आद्यभगवत्पादापरावतारभूता इव एते सर्वत्र विजययात्रां कुर्वन्तः सनातनं धर्मम् अद्वैतसिद्धान्तं चैव पुनः प्रातिष्ठिपन् । तदा काश्मीरान् एत्य तत्र क्षीरस्वामिप्रभृतीनाम् अष्टानां महाविदुषां विजेतारं भट्टोद्भटनामानं दुर्जय्यं पण्डितं वादैर्विजित्य वाग्देव्याः शारदायाः पुरस्ताद् सर्वज्ञपीठम् आरुरुहुः । इदं च गुरुरत्नमाला-सुषमा-तदुद्धृत-शङ्करेन्द्रविलास-सद्गुरुसन्तानपरिमल-प्रभृतिषु बहुषु ग्रन्थेषु वर्तते । एषां सिद्धिः हिमालये ।

षट्चत्वारिंशपीठाधीशानां **सान्द्रानन्दबोधेन्द्रसरस्वतीचरणानां** (क्रि०प० १०६०-१०९७) काले शारदाश्रीमठस्य म्लेच्छैः उपद्रवः क्रियमाण आसीत् । तदा आचार्यैः स्वानुसृतरक्षायै चोदितः काश्मीरिकस्य कलशेश्वराख्यस्य महाराजस्य मन्त्री उपद्रुतिविधायकान् म्लेच्छान् प्रद्रुतिपरान् चकार । एषाम् आचार्याणां सिद्धिः अरुणाचले ।

सप्तचत्वारिंशपीठाधीशानां **चन्द्रशेखरेन्द्रसरस्वतीश्रीपादानां** (क्रि०प० १०९७-११६५) काले काश्मीरेषु कुमारपालो नाम जैनो राजा आसीत् । सः हेमाचार्यनाम्ना जैनाचार्येण सम्मोहितः आसीत् । तां काश्मीरनृपसभां गताः आचार्याः तत्र अद्वैततत्त्वं स्पष्टं प्रतिपाद्य तं च हेमाचार्यम् अपाकृत्य पुनरेव काश्मीरेषु धर्मं प्रत्यतिष्ठिपन् ।

अष्टाचत्वारिंशपीठाधीशाः **अद्वैतानन्दबोधेन्द्रसरस्वतीचरणाः** (क्रि०प० ११६५-११९९) प्रसिद्धेन काश्मीरिकेण शैवागममतावलम्बिना अभिनवगुप्ताख्येन सह वादं कृत्वा जितेन तेन पूजिता अभूवन् ।

गुरुरत्नमाला-सुषमा-पुण्यश्लोकमञ्जरी-प्रभृतिषु ग्रन्थेषु एतावद् लभ्यते इति स्थालीपुलाकन्यायेन उदाहरणमात्रं प्रदर्शितम् । भूयः अस्मिन् विषये संशोधनं क्रियते चेद् भूयांसो विषया लभ्येरन् ॥

जयेन्द्रगुरुकृपावतः सदाशिवेन्द्रसरस्वतीसेविनः । श्रीगुरुचरणयोरस्तु भणितमिदं सुमान्तरं सुरभि ॥

-*-*-*-